गैर्वाणीगौरवग्रन्थमाला

गीर्वाणवाणीगौरवभूतप्रत्ननूतनलघुग्रन्थानां सङ्कलनम्

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठशोधपत्रिकायाः
परिशिष्टम्

प्रथमं प्रसूनम्

त्रिलोकनाथमिश्रविरचितम्

दुर्मिलाशतकम्

सम्पादकः
डा० जगन्नाथ पाठकः

Journal of G. N. Jha Kendriya Sanskrit Vidyapeetha
Vol. XXXIV No. 3—4
चतुस्त्रिंशत्तमे भागे तृतीयचतुर्थाङ्कौ

त्रिलोकनाथविरचितम्

दुर्मिलाशतकम्



सहसरामवास्तव्याः श्री पं० बलदेवपण्डितमहाशयाः
येषां सौजन्येन विविधविषयाभिरनेकाभिः पाण्डुलिपिभिः सह
दुर्मिलाशतकस्य पाण्डुलिपिः प्राप्ता ।

FOREWORD

Durmilāśatakam is a small Kāvya consisting of about one hundred stanzas composed in *Durmilā* metre and dealing with the themes connected with renunciation (Vairāgya). It aims at creating detachment from worldly pleasures among its readers. The author is sure that the person going through the stanzas of this *Śataka* is bound to attain liberation "in the manner one achieves his newly wedded young bride".

The Kavya was composed towards the end of the 18th century (in 1794 A. D.). Nothing is known about its author except that he was a son of Vaidyanātha and that he lived in the later half of the 18th century, probably in Bihar.

The only MS of this work was procured by Dr. Jagannatha Pathak from the private collection of Shri Baldeva Pandit of Sasaram.

We owe him deep gratitude for making this rare work available to us and hope that our readers shall welcome its publication.

Dr. G. C. TRIPATHI

PRINCIPAL

गैर्वाणीग्रन्थमाला गंगानाथझा-केन्द्रीय-संस्कृत-विद्यापीठ शोधपत्रिकायाः परिशिष्टरूपेण प्रकाश्यते अस्यामप्रकाशितानि पुनः संपादितानि वा विविधग्रन्थ-प्रसूनानि संगृहीतानि भवन्ति । एतानि पुस्तकप्रसूनानि स्वतन्त्रतयापि स्वल्पमूल्येन क्रेतुं शक्यन्ते ।

प्रधानसम्पादकः प्रकाशकश्च
डा० गयाचरण त्रिपाठी
प्राचार्यः
गंगानाथझा केन्द्रीय संस्कृत विद्यापीठम्
प्रयाग-२

त्रिलोकनाथमिश्रविरचितं दुर्मिलाशतकम्

डॉ० जगन्नाथ पाठकः

पाण्डुलिपिः

ग्रन्थस्यास्य पाण्डुलिपिर्द्वादशपत्रपरिमिताऽस्माभिः विहारराज्यान्तर्गतसहसरामवास्तव्य-पण्डितबलदेवपण्डितमहाशयानां गृहात् अधिगता। प्रत्येकं पत्रे एकादश पङ्क्तयः, प्रत्येकं च पङ्क्तौ एक-चत्वारिंशत्परिमितानि द्वाचत्वारिंशत्परिमितानि वाऽक्षराणि सुपठानि देवनागरीलिपिनिबद्धानि सन्ति।

विभिन्नपाण्डुलिपिसूचीग्रन्थानां परिशीलने क्रियमाणे क्वचिदपि ग्रन्थस्यास्य पाण्डुलिपेः सूचनाऽस्माभिर्नाधिगता। अतः प्रस्तुतस्य संस्करणस्याधारभूता निर्दिष्टा पाण्डुलिपिरेव। अस्याश्च लिपिकर्त्रा विहारिणा १९३० वैक्रमाब्दे 'अग्रहणकृष्णपञ्चमीरवौ' प्रतिलिपिः कृतेति ग्रन्थान्ते तेन स्वाक्षरैर्निर्दिष्टम्।

लेखकः

शतकस्यास्य रचयिता वैद्यनाथात्मजस्त्रिलोकनाथमिश्र इति स्वयमेव ग्रन्थान्ते तेन निर्दिष्टम्—

"शाके शास्त्रेन्दुसप्तोवधिसुतमितिगे नाथनामान्तवैद्यो-
द्भूतस्त्रैलोक्यनाथो निखिलबुधजनान् सङ्गमा(?)तापतप्तान्।
दृष्ट्वा वापीव्य(व्यं)धत्त प्रचुरहरिरसा दुर्मिलाबद्धतीर्थाः
सद्रत्नैर्नामभिस्तै [र्] विमलमतिधृतैर्यानि लोकान् पुनन्ति॥"

अथ च पुष्पिका—

"इति श्रीसामन्तचक्रचूडामणिमरीचिनि(नी)राजितचरणपङ्कजश्रीमिश्रवैद्यनाथात्म-जश्रीत्रिलोकनाथमिश्रकृतं दुर्मिलाशतकं समाप्तम्।"

पूर्वमुद्धृते पद्ये 'शाके शास्त्रेन्दुसप्तोदधिमुतमितिगे' इत्यस्य १७१६ शकसंवदित्यर्थः। एवं १९०० वैक्रमाब्दे, अर्थात् १७९४ ख्रीस्तीयाब्दे ग्रन्थस्यास्य प्रणयनं सञ्जातम्।

'न्यू कैटलागस कैटलागरम' ग्रन्थस्यावलोकनेन लेखकस्यास्य अपरं कृतिद्वयं विदितं भवति यथा,

१. कारक (or कारकार्थ) निरूपण or षट्कारक° (1163 अलवर, extra 264).
२. राधागोविन्दनाम्नि काव्ये व्याख्यासुधा.

लेखकस्य जन्मस्थानजन्मकालादिविषये न किञ्चिदस्माभिरुपलब्धम् । निर्दिष्टमपरं कृति-द्वयमद्यावधि नास्ति प्रकाशितमिति मन्ये ।

ग्रन्थपरिचयः

शतकमिदं वैराग्योद्‌बोधनार्थं कविना विरचितमिति स्वयमेवान्ते निर्दिष्टमेभिः शब्दैः—

इमा दुर्मिला दूतिका यस्य हस्ते कृता श्रीत्रिलोकेन नाथोद्‌भवेन ।
विरक्त्या सुसं(स?)ख्या युता मुक्तिरूपा नवीना वधूस्तस्य हस्तं गता स्यात् ॥

सखीरूपया विरक्त्या सहिता मुक्तिरूपा नवीना वधूरुपलब्धुं शक्यते दुर्मिलाशतकस्याध्ययन-शीलेन जनेनेति कवेरभिप्रायः । (अत्र विरक्तेः सखीरूपत्वं मुक्तेश्च नवीनवधूरूपत्वञ्च कविना वैराग्य-भावनोद्‌बोधनार्थं लिखिते काव्ये किञ्चिदिवानुचितं प्रतिभाति, शृङ्गारस्य वैराग्यतः सर्वथा भिन्नत्वात् विपरीतत्वाच्च) । काव्यं माध्यमतया प्रस्तूय भर्तृहरिणाऽपि वैराग्यशतकं व्यरचि संसारमसारं परि-कल्पयता । किन्तु यथा भर्तृहरेर्जीवने घटनावशतो जगद्‌विषयं निर्वेदपरिगतं चेतः समजनि तथैव दुर्मिलाशतकस्य रचयितुरपीति तद्‌विषयकज्ञानाभावेन न किञ्चिद् वक्तुं शक्यम् । अत्र स्वयं कविरपि आत्मनः संसारसागरमग्नं चित्तं सम्बोध्य हरिभक्तिं प्रत्यनुरक्तं विधातुं प्रयतते । अत. सम्पूर्णतयाऽत्र स्वं मन एव वैराग्येन प्रभावितं विधाय हरिभक्तिं प्रत्युन्मुखीकर्तुं प्रयतते ।

सर्वथा वैराग्यमूले भक्तिकाव्येऽस्मिन् हरिभक्त्या क्वचिन्महापुरेण क्वचिन्नद्या क्वचित् सुधारसेन चाभेदारोपरूपरूपकालङ्कारसमाश्रयणं विशेषेण कविना कृतम् ।

छन्दश्चात्र दुर्मिलेति नाम । तल्लक्षणं, यथा—

वसुभिश्च रसैरथ दिग्भिरुदीरितसद्‌यतिका विहिता हि यदा
सगणाष्टकभूषितसच्चरणा जितदुर्नय दुर्मिलकेति तदा ।
फणभृत्कुलमङ्गलपिङ्गलनायकनागवरात् प्रथिता सुखदा
यशवन्त नराधिप गौडकुलोज्ज्वल तामवधेहि हृदेह सदा ॥

(चिरञ्जीवभट्टाचार्यविरचितवृत्तरत्नावल्या उद्‌धृतम्)

वस्तुतस्तोटकवृत्तस्य द्विगुणितं रूपमिदम् ।

पाण्डुलिपिरियं १९३० (षडधिकशतवर्षपूर्वं) वैक्रमाब्दे बिहारराज्यान्तर्गतसहसराम-वास्तव्येन पं० विहारिणा लिखितेति ग्रन्थान्ते निर्देशेनावगम्यते ।

त्रिलोकनाथमिश्र-विरचितं

कुम्मिलाष्टकम्

विषयानलतः पतिपुत्रकलत्रसमिन्धनसंज्वलितादमुतः
परिदग्धमहर्निशमेव मनो मम तिष्ठसि मूढ समादहतः ।
न भविष्यति तापविनष्टिरहो तटिनीतटिनीपतिसंवरतः
शृणु मद्वचनं च गमिष्यति ते तपनं हरिभक्तिमहारसतः ॥१॥

भवसागरमध्यगतो वनिताजनतामकरीगिलितोऽसि कथं
सुतबन्धुकलत्रमहोरगदंशनतापतपद्वलितोऽसि कथम् ।
सततं जननं मरणं च गिरिं गत एव पुनः पतितोऽसि कथं
हरिभक्तिसुनावमधिश्रित एव तर द्रुतमेव मृतोऽसि कथम् ॥२॥

न धनं न जनं न वनं करणं कलयामि नरे नृपतो भरणं
न पुनः कविता वनितां सुमुखीं न च मुक्तिसुखं बहुशो गमनम् ।
न रमे परमे चरमेऽपि वयःक्रमणे भ्रमणे न ददे मननं
गरुडासनशङ्खगदाधरणीभरभृच्चरणं तु भजे शरणम् ॥३॥

कतिधा भ्रमता भवता वनिताधरबिम्बमधु प्रचुरं रसितं
विशताऽमि शिता रसिता विपुलं बहुलं मधुरं फलमाचषितम् ।
मधुरेक्षुरसोऽपि परः परतो घृतयुक्तपयोऽपि मुहुः कलितं
वद चित्त महाहरिभक्तिरसे मधुरत्वमहो न कुतोऽपि चितम् ॥४॥

सुतबन्धुकलत्रकदर्थनतः परिभाववशात् कतिधा रणिता
नगरे नगरे सुरटन् सुपठन् नृपतिं नृपतिं बहुधा चलिता ।
न कुतोऽपि गतोऽसि सुखं मम जि(जी)व ततोऽपि कथं च मुहुः कमिता
शृणु सम्प्रति रे हरिभक्तिमहापुरतो भवता बत सङ्गमिता ॥५॥

धरणीरटनं भ्रमतः पठनं कठिनं विदुषां कलहे विहितं
रमणीवदनं विरहाय विधुद्युतिसंहरणं नयने ष(ख)चितम् ।
नृपसद्मनि मानविनाशकृते मम जीव पुनः पुनरेव गतं
सुखदं शुभदं त्रिदशालयदं हरिभक्तिनदीतरणं न कृतम् ॥६॥

विमना विषये कुटजे कुटजे रमते मधुपानकृते भ्रमरः
लसनेऽभिमतं न परं पतिते(तो ?)मधुपानकृते घटते मुखरः ।
न यतोऽपि ततोऽपि कुतोऽपि गतो न रतिं रणिता कमिता विधुरः
शृणु तिष्ठ मधुव्रत रे श(स)ततं हरिभक्तिसुधारसमत्ततरः ॥७॥

बहुदीनवचो वदता नयता दिवसान् बहुशो न रतिर्विहिता
जहता च समानमहो मम जीव कुमानकृते कतिधा न गता ।
पुनरौदरी(रि)की परिवृत्तिरियं च ततोऽपि यतोऽपि न पूर्तिमिता
वसती रिपुभी रहिता शठ रे हरिभक्तिपुरीह कुतो न कृता ॥८॥

विमुखे त्वयि नाथ परं सततं जननं मरणं शरणं कथितं-
सुमुखे पुरुषे भवतीह पुनर्बहु मुक्तिसुखं लभते लपितम् ।
अत एव परं विलपामि विभो न कदापि भवत्तप आचरितं
न नुतिर्न नतिर्न मतिर्विहिता कथमाशु भवेद् भवतो हि गतम् ॥९॥

करुणावरुणालय नाथ हरे मयि दाश(स)जने करुणा न कृता
न कृता त्वयि सम्प्रति संस्तुतिभभ्यगते न रतिर्न धृतिर्विहिता ।
विहिता विषयेषु वनेषु मया भवदङ्घ्रियुगे न नती रचिता
रचिता च रतिः कुनृपे सुनृपे कुजने मम का च गतिर्भविता ॥१०॥

जननानि गतानि बहु(हू)नि विभो स्मरणानि कृतानि न ते विदितं
कलितं न मया भवतो हि गतं सकलेषु स्थितं मनसा न धृतम् ।
कथमद्य तरामि विना कृपया भवसागरभीमतरङ्गततं
विनयामि सुतारय नीरधितोऽत इमं भवतश्चरणे पतितम् ॥११॥

श्रवणं मननं स्मरणं न कृतं भवतो रटता विषये न हता
श्रुतिरर्थगता विफला मयि भाति ततः शमनीयपुरं श्रयिता ।
यदि नैव समुद्धरणं भवतो मम तत्पुरतोऽपि न मे चलिता
चलिता च कथञ्चिदहो धरणीधर कासु कुयोनिषु वै भविता ॥१२॥

पुरतो भवतो रसतोऽपि मया नटता दिवसः परियापयिता
न सुतोऽपि विभूतियुतोऽपि कुतोऽपि नतोऽपि मया परिभावयिता ।
धरणीधर नाथ मुकुन्द हरे सुमति[ः]कुमतिः खलु कारयिता
चिनयामि परश्च भवानि विभो तव भक्तिमहारससाधयिता ॥१३॥

दिवशाः(साः)परियान्तु तवामलया कथया श्रुतया सुरभावितया
सुखया हितया मुनिमानसया गतया बहुशः श्रुतिसेवितया ।
सनकादिमनोरतयाऽऽशु मया निजकिङ्करभक्तमनोधृतया
सकलं श्री(श्रि)तयामृतभावनया दयया भवता ततया नु तया ॥ ४॥

श्रवणे शृणुतां चरितं भवतो नयने तनुमेव विलोकयतां
यमुनातटराश(स)वने विलश(स)द्धरणौ चरणौ च सदा चलताम् ।
नटतां च तथा रसना भवदीयलश(स)त्स्तुतिमेव सदा कुरुतां
चरणे तव मुक्तिसदाकरणे नृहरे च मनःशिरसी नमताम् ॥१५॥

वपुरीश(ष?)मलप्रचुरं च मनः सततं सुतबन्धुकलत्ररतं
नयनं रमणीवदनद्युतिसत्सरसीतरणेषु सदा[ऽ]विरतम् ।
रशना दधिदुग्धरसाकलना श्रवणं रमणीमुखरागगतं
धरणीधर नाथ मुकुन्द मृषा जनुषा पुरुषाकृतिना विगतम् ॥१६॥

जननी जनकं परिनिन्दतु दुर्वचनं सततं वदतु प्रचुरं
जनकोऽपि हरे नृहरे बत मामलसं विलसं भुवि धूर्ततरम् ।
परिभर्त्सनमेव जनोऽपि तथा कुरुतां वदतु प्रश(स)भं न नरं
तव भक्तिमहारसमत्तमना विलुठामि नटामि रटामि परम् ॥१७॥

रजनी सुकलत्रसुखाहरणे गमिता सुतलालनतो दिवसाः
नटधूर्तविदूषकसङ्गवसे(शे)न मया विहिता नमदाविरसाः ।
क्षणभङ्गुरदेहसुखादिकृते सुगृहा रचिता नृहरे सरसाः
चरणौ सुखसम्मतिदौ हरणौ विपदां भवतो न धृतौ मनसा ॥१८॥

अमरेशदिनेशगणेशमहेशजलेशनिशेशभवेशमुखाः
भवदङ्घ्रिसमीपधरातलमध्यगता विनटन्ति सदा सुमुखाः ।
तव पादसरोजनता विरता नृहरे सुरकामसदाविमुखाः
परिपूर्णकृपारसमग्नतरा विलसन्ति हसन्ति हरे ससुखाः ॥१९॥

भवनाशनशासनशङ्खगदाधरभीहर नाथ समुद्धर तं
नृपभूपमिव द्रुतमेव महावनमध्यविराजितकूपगतम् ।
गगनाभ्रनभःखनभःश्रुतिनागमितं भवशा(सा)गरजन्मगतं
मनसा वचसा सहसा वत येन भवत्पदपद्मयुगं न धृतम् ॥२०॥

जननी जनका(?)च वभौ भवतो मम संसृतिसंहरणौ चरणौ
भगिनी भवतस्तनुरेव विभौ सुखदा शुभदाऽमृतदा धरणौ ।
नयने रुचिरे तनयौ विहितौ भवतो हृदि भावनया भरणौ
श्रवणं मननं भवदाय(व?)हरौ विषयानलतापसदाहरणौ ॥२१॥

न गया सममानि मया दयया भवतः परयाऽभयया मधुरा
अमरा अपि ते पदकञ्जधरा भ्रमरा इव नाथ न ते सुतरा ।
सकलाघहराऽमृतपुञ्जकरा तव पादपरा न तथा मधुरा
भवसिन्धुमगाधमिमं हि तरन्ति तवैव भवद्दययैव नराः ॥२२॥

भजनं जननी तव भक्तिरियं मम शो(सो)दरमासमसूत सुतं
मननश्रवणस्मरणादिकसद्धनधामसभाकरणे विनतम् ।
नियमासनमानसशासनशा(सा)मसुखादिकशं(सं)ततिशौ(सौ)ख्यहितं
सुतबन्धुकलत्रमहामदमोहमहारिपुसंयुगमध्यरतम् ॥२३॥

कमलाधव नाथ महारिपुनाथ तथा बलिनाथ मृताहरणे
सकलेश्वर हे अमरेश्वर हे जगदीश्वर हे ममताकरणे ।
वसुधाधर भाधर माधर हे विनताधर योगिहृदारमणे
जनभीहर धीहर भक्तहृदो नतिरस्तु सदा भवतश्चरणे ॥२४॥

भवतः श्रुतितः श्रवणाम्बुधिमध्यगतो मननं तरिमाकलयन्
भवदीयमहागुणवर्णनयुक्तमनोदृढधीवरतो वलयन् ।
महदादिकवेदगरुन्मिततत्त्वविचारविरक्तिजले रटयन्
भवदीयशु(सु)चाक्षुषरत्नमहो सुलभे हृदिदं चरणे नमयन् ॥२५॥

भ्रमता भ्रमरेण भुवं सरसा मनसा विरसं कमलं प्रचुरं
विषयं रसता क्षणभङ्गुरमोहमहामदकायमहामधुरम् ।
दिवसा गमिता नसिता न भवच्चरणा रटितं हि मृषा विधुरं
चरणद्वयकञ्जगलन्मकरन्दरसाहरणं न कृतं सुचिरम् ॥२६॥

अनुरागवलन्मनसा न कृतः करपङ्कजतः कुसुमावचयः
रसनामधितिष्ठिति पुत्रकलत्ररशा(सा)दिह ते न गुणप्रचयः ।
चरणौ चलतो न गृहं भवतो न ट(द ?)शोस्तव रूपमयूष(ख)चयः
मम नाथ तथा कुरु ते भजनेऽमृततुल्यतरे मृतकस्य न यः ॥२७॥

जनिते (तो?) जनकेन विभो भवता धरणीधर नाथ मनस्तनयः
निवृतिं दयिताञ्च विहाय शठो भजते प्रकृतिं गणिकामवयः ।
घटते विटधूर्तगणे विषये न भवन्तमयं भनुतेऽविनयः
तदयं परितिष्ठतु बद्धतरस्तव भक्तिसुरज्जुवशादभयः ॥२८॥

यदि बालक एव विराजसि जि(जी)व तदा हरिनाम पयः पिब रे
मधुपो भवसीह यदा तरुणो मधु नाथपदाब्जभवं पिब रे ।
रट मा नट मा पठ मा शठ मा वद मा गद मा रद मा शृणु रे
अबलोऽतरुणो भव एव सखे न कदापि हरेः पदतश्चल रे ॥२९॥

न तरिर्न गुणा न च धीवर एव न वा तर एव न मे शरणं
वदसीति असी(शी)तिवयः कथमद्य तरामि मनः शृणु रे वचनम् ।
हरिभक्तितरिर्गुण एव हरे हरिधीवर एव रणं शरणं
तरिदण्ड इह प्रचुरं श्रवणं श(स)ततं मननं न तथा पणनम् ॥३०॥

यदि शे(से)वितुमिक्ष(च्छ)सि चित्त नयं भज श(स)त्वरमेव विवेकनृपं
नियमासनयामशमादिचमूविजितप्रभुमोहमहो सुरूपम् ।
मुदिताकरुणासुसखि(खी)सहितोपनिषद्वनिताकरपल्लवयं
तदयञ्च करिष्यति शे(से)वकमेव महाहरिभक्तिपुरि(री)नरपम् ॥३१॥

तृणशीतसमं मृगनीरसमं नभसः कुशु(सु)मेन समं विफलं
वपुरेतदनित्यमहो सुतवन्धुकलत्रयुतं विषयैः समलम् ।
परिभावयदन्तसमं वयसोऽपि चलं·····नलवत्तरलं
तदहो परिशा(सा)धय धामपथं हरिपादश(स)रोजरथं विमलम् ॥३२॥

यदि दीर्णमनेन हृदा न वपुर्ज्वलदग्निगतं च विलोकयता
तदहं परिवेद्मि विभो विहितं श(स)दृशं दृषदा विधिना भवता ।
अधुना भ्रमरं प्रकृतीदमये क्रियतामुपलं सकलं सृजता
ह्रियता वपुषो ममतापदपद्मगलन्मकरन्दरसं पिवता ॥३३॥

किमु तेषु सुतेषु जनेषु कुचेषु मुखेषु रतेषु रतिं कुरुषे
य इमे जनकं जहति द्रुतमेव मृतं विरमाशु हरौ पुरुषे ।
वहलं पललं रुधिरं च कुचे न रतिं कुरु रे रुधिरौघमुखे
कललं श्रवदस्ति यतो हि रतान्न कुचादि भवेद् भवतो हि सुखे ॥३४॥

श्रवणे रुचिरस्ति मनः शृणु रे हरिकीर्तनजन्यगुणानखिलान्
यदि रूपविलोकनतत्परता सुविलोकय नाथलसच्चरणान् ।
यदि गन्ध रुचिर्नसि धारय रे हरिपादसुपूजितपुष्पचयान्
मनसा हरिमेव चिरं परिचिन्तय चिन्तय मा विषयान् सकलान् ॥३५॥

सुतबन्धुकलत्रमहाकुकुरध्वनिधावनतो रिपुशाखिघने
दृढजालसुमध्यगतो विमनाः सुमना हरिणो भवसीह वने ।
रसरूपसुगन्धनभोगुणजन्तुमहन्मुखसिंहसुशोभिरणे
हरिपादसुभक्तिसुकर्तृकपापरि(चि ?)भेदनतो लस देवगणे ॥३६॥

न जपो न तपो नरपो बहुशः श्रित एव कथं शमनं हि सहे
न हरिर्जपितो नमितोऽपि कदा रमितो विषयो जनुरेव वहे ।
कलिता रतिरेव मया श(स)ततं जन हे धन हे मति हे क्व तिहे(?)
धरणीधरनाथकृपावशतः सकलं मृगनीरसमं विरहे ॥३७॥

जनको जननी वसुमित्रकलत्रसुपुत्रमरातिकुलं सकलं
शयनस्फुरणेन समं परिभातमिदं बत जागरणे विफलम् ।
कथमद्य मृषा परिरक्तमहो मम चित्तमिदं रमते विकलं
भजते न परं भवनाशकरं श(स)कलं प्रचुरं शरणं विमलम् ॥३८॥

विफलीकुरु तत्त्वकृतं सकलं सफलीकुरु तत्त्वमसीति विषं
रिपवस्तव भेदपि(यि ?)तृप्रचुरं मदमोहसुखादि विहाय रुपम् ।
यदनेन मृताः ससुताः परिवारयुना जगतीह तदेशसुखं
सुलभं भगवच्चरणं सुलभा लयमुक्तिपुणी सकलं विमुखम् ॥३९॥

हरिभक्तिपुरीह वसन् सुमनो हरिकीर्तनसद्म शुभं रचयन्
लयसद्धनसङ्ग्रहणेन गृहं परिपूरय वित्तसुतं द्रढयन् ।
परिबोधसुतप्रचुरोदयसंविहितेन परं तमतो गुणयन्
परिपूरितसद्मधनव्ययतो हरिलीनतरो भव संघटयन् ॥४०॥

गुणवृद्ध मनो मम रे कुपुरे गतमस्ति सुखं च तथा विसुखं
नवरन्ध्रयुते पवनीभवदेव कदापि भवे न(र्न)ततो विमुखम् ।
यदि निर्गुणतामवलम्ब्य विहारमुरीकुरुषे दयसे हि सुखं
भगवच्चरणे लयमाकलयन् न पुनर्विदधासि जनुः कलुषम् ॥४१॥

दुरदिष्ट मनो मम रे जगति भ्रमदत्र जहासि कथं रमणीं
निवृत्ति(तिं)पतिमात्ररता(तां ?)भवसागरमध्यपतज्जनखन्तरणीम् ।
सकलेषु रतां परिशुचिमिमां न जहासि भवच्चलताकरणीं
जनके पुरुषे विलयं कुरु तत्सहितां प्रकृतिञ्च जहज्जननीम् ॥४२॥

मदमानसुगानसुलोभसुमोहमनोजमुखा रिपवः प्रबलाः
यदि सन्ति मनो जगतीह पुनः(र्)भयदा वनितापि तथा सकला ।
तदुपायमहं कथयामि शृणु प्रथमं क्रियताञ्च मतिर्विमला
अनयैव पिशाचीं(चि)कया स्थिरया मृत(?)एव भवदुरिपवः कुटिलाः ॥४३॥

करुणानिधयस्तव सन्ति विभो करुणानिधिमर्पय दासजने
अधमोद्धरणं कुरुषे यदि नाथ तथाऽधम एव जनो(नो ?)भुवने ।
शरणं शरणार्थिजनाय ददासि तदा गत एष जनः शरणे
भवसागरपारविधायक एव तथा जन एष रतश्चरणे ॥४४॥

अस(श)नं वसनं शयनं रटनं पठनं विपथे रहितं चलनं
यदि वाञ्छसि रे जगतीह मनो मम पथ्यमिदं शृणु रे(मद्)वचनम् ।
अस(श)ने फलमेव तथा वसने त्वगियं शयने धरणीलुठनं
रटने हरिमन्दिरमेव तथा पठने हरिनाम गमे गहनम् ॥४५॥

भवकूपमिमं पतितोऽसि कथं विषयप्रचुरोदकभीमतरं
मदमोहसुतादिमहारिपुभिः परिपातित एव गभीरतरम् ।
तदुपायमहं त्वरितं कथयामि शृणुष्व हृदा हितमेव परं
पतितोद्धरणं भगवच्चरणं शृ(श्रि)त एव समुत्तर शि(शी)घ्रतरम् ॥४६॥

गलिता रदना ललिता विशदा रुचिराश्चिकुराः प्रचुरा[ः]पतिताः
भजते लगुडं त[व]पाणियुगं विषयादिकृता ममता न गता ।
नयनं त्रि(ति)मिरैः खचितं परिभाति न भाति भवत्तिमिरावृतता
त्रिवलीपरिबन्धमवाप कपोलयुगं न मनस्तव बन्धनता ॥४७॥

सकलं विषयावृतमेव विभाति निरावृत्ति(ति)रे भगवच्चरणं
प्रकृतेर्विकृतं जगदेव विभाति तथा[ऽ]विकृतं भगवद्भजनम् ।
अतएव कुरुष्व तदेव पुनः पुनरेव यतो न जरामरणं
न भविष्यति तासु पुनः सकलासु कुयोनिषु सुयोनिषु ते भ्रमणम् ॥४८॥

यदि यापयसीह दिनानि तदा परियापय नाथमठक्रमणे
प्रकृतिं विकृतिं च विहाय मनः परिचिन्तय सम्प्रति तच्चरणे ।
प्रकृतिर्विकृतिर्विततापरिभाति यतो भवतो हि जनुर्मरणे
तदिदं सकलञ्च मृषा परिभावय भावय नाथ पदं तरणे ॥४९॥

धिगिदं मन एव यतश्चरमेऽपि वयःक्रमणे प्रकृतिं भजते
न हरिं मनुते तरुणं वपुरेतदहो' 'न पुनस्त्रपते ।
तदधीनतया नवमे च भवद्विषये विषये प्रचुरं रमते
नटभण्डकभट्टगणेषु गृहेषु रतिं विपुलां श(स)ततं तनुते ॥५०॥

हरिकि(की)र्तन एव विधेहि रतिं न च धेहि सुतादिजनेषु मतिं
जननीजठरे शयनं यत एव ततः खलु तेषु न धेहि यतिम् ।
हरिपादश(स)रोजयुगेषु रतिं कुलनेन(?)कुरुष्व भवेषु गतिं
अवनीधरनाथमुकुन्दहरिप्रमुखे(खे)षु च नामसु धेहि नतिम् ॥५१॥

यदि चञ्चलतामयनाशकृते भिषजं लभते न गदौघहरं
तदहं कथयामि महाभिषजं हरिमेव महामयनाशकरम् ।
लश(स)दङ्घ्रिसरोजयुगद्वयभक्तिरसं रसमेव ददामि परं
चलतारुजमाशु हरन्नपि किञ्च हरिष्यति तापगदं प्रचुरम् ॥५२॥

यदि नन्तुमना अमरं कमपीह तदा नम रे हरिपद्युगलं
गमनागमनप्रदमेव परं स्तुतिसौख्यकरं स्मृतिदं श(स)कलम् ।
रजसा सहितं तमसा वलितं दितिजाकलितं कलय त्वमलं
गमनागमनामयनाशकरं दुरितौघ[ह]रं रुचिरं तदलम् ॥५३॥

भवभीममहाघनसद्विपिने सुतबन्धुकलत्रलसद्भरिणे
रसरूपसुगन्धनिनादवलद्ध(?)कनाशितसद्व्रतिव्यालगणे ।
हरिभक्तिसुजाल[क]म(मा)श्रित एव मृगाधिपतेर्भलसो हनने
यमसंनियमप्रमुखैः सह रे मृगयी(यो?)कुरु तन्न भयं गहने ॥५४॥

अतिनश्वर एव सुखे भ्रम जीव विहाय कथं हरिनाथपदं
भ्रमसीह भवेऽभवदं भयदेऽभयदं मृतिदे मृती(ति)दं सुखदम् ।
जननी यत एव परा निवृतिर्जनको यत एव विवेकतरः
अनुजो यत एव महासुखदो मिलतीह परं परिबोधतरः ॥५५॥

ननु रे हरिरेव परं परमस्त्वमपीह बभूविथ सच्चरमः
तदपि प्रचुरं विषये विरसे यतसे बहुधा रमसे रसमः ।
अभिमानलसद्गजकुम्भगतो मनुषे न जगत् सकलेष्वसम-
स्तनुषे गुणगौरवमेव सभामभितो न नतोऽसि महानधमः ॥५६॥

सति सम्प्रति ते ददति स्वपदं कमलाधिपतौ सुमतौ पुरुषे
जगतामधिपे मनसा कलिते सहसा वलिते च हरौ सुमुखे ।
सकलेप्सितसिद्धिकरे दुरितौघहरे विमले सकलेऽकलुखे(षे)
अधमे रतिमद्य कथं कुरुषे मतिमूढ मनः कुजने विमुखे ॥५७॥

हरिपादश(स)रोजगलन्मकरन्दकृते तरला भ्रमरा अमराः
वद मानसभृङ्ग कथं रसिताः क्षणिका विषयाः कमलप्रकराः ।
नटनाटकशाटकचेटककर्तृ विटेशसुकीटविजु(जु ?)ष्टतराः
शुचितो रुचितो रसतो गुणतो जनसन्ततितोऽपी(पि)च हीनतराः ॥५८॥

शृणु पुण्यनदीतटसद्वटरङ्गधरामधिगम्य नटो भव रे
हरिकि(की)र्तिनटीसहितो हरिनामसमाजगतो नटनं कुरु रे ।
हरिसद्गुणगानमलं विदधद् विहसन्मुखमद्य परं लस रे
अथ दास्यति ते परितोषकृतेऽमृतरत्नमथं च सुखि(खी)भव रे ॥५९॥

रमणीयतराणि बहूनि वनानि लसन्ति च तत्र''''गृहान् रचय ?)
रचय श्रवणेन मनः सम्मुदा म[न]नेन तृणेन कुरुष्व दृढान् ।
उपरि स्मरणेन लश(स)द्वलभीधरणेन विधेहि च संवलितान्
अमृतं तदहो व्यवहृत्य लश(स)द्धरिनामधनैः कुरु सम्भरितान् ॥६०॥

यमुनातटकुञ्जकुटीरगतं मुरलीमधुरध्वनिभङ्गिनुतं
व्रजगोपवधूजनहक्कमलैः परिपीतमुखं व्रजबालयुतम् ।
अती(ति)ति(ती)क्ष्णकटाक्षचलच्छरतः परिविद्धलश(स)द्व्रजसद्वनितं
वृषभानुसुतानयने क्वचितं भज रे सततं वसुदेवसुतम् ॥६१॥

भवतापतपद्वपुषः सुजनाः हरिपादश(स)रोजलसन्नयनाः
अतिनिर्मलरूपरसादिमहाविषयारिमुकुन्दकथाश्रवणाः ।
भगवज्जनसङ्गकृतः सततं नरकान्तकतीर्थकथाश्रवणाः
अतिशान्तसुनिर्मलचित्सुखसज्जलयुक्तनदीकृतसन्तरणा [:] ॥६२॥

जनको जननी न सुतो वनिता जनता[न]च वन्धुजनः कमिता
भवतापहनै(रै ?)व गमिष्यति तत्कथमेषु जनेषु पुनर्भ्रमिता ।
न च तैरपि साकमहो नियतं न कदापि परं न भवा(वे)श्चलिता
हरिनाम सहाय इहातितरां यमसद्मनि वैभवतो भविता ॥६३॥

तव मूर्ध्नि(र्धनि) मृत्युरयं भुजगो विदधाति पदञ्च करालतरा
भुजगीव जरा दशति प्रचुरं विषयैश्च विषैरपि पूर्णतरा ।
असू(सु)री वत संसृतिराग्रसते च भवन्तमिथं खलु घोरतरा
तदहो हरिनाममहामनुमेव जपस्व मतो न च भीतिकरा ॥६४॥

विषयः कति वा न गता निधयः पतयः सुरलोककृतां पतयः
मनवो मुनयः कति वा न मृता धरणीपतयो वनसग्द(द्रुग ?)तयः ।
तदपीह कथं भवतः सुतबन्धुकलत्रजनेषु लश(स)द्रतयः
अतिनिर्मलसच्चि(च्चि)दनन्तमहिम्नि हरौ करणीयतरा मतयः ॥६५॥

वणिते सुमते परुषे पुरुषे कुमुखे कुरुषे कथमद्य पतिं
पुरुषञ्च विहाय नतोपनिषत्करुणा मुदिता न करोति गतिम् ।
प्रथमं सुसखीभिरमूभिरलं विहरस्व यतस्व लभस्व रतिं
तदनन्यविवेकधवे सुनवे मिलिता रसिता च विधेहि रतिम् ॥६६॥

ध्रुवमेव मही गिरिनीरधिचन्द्रदिवाकरदेवभूतिर्भविता
इति किं मनसीह विचारयिता न कदापि भवादसुतश्चलिता ।
क्षणिकैरपि मित्रकुवन्धुजनै[ः]सह संगतिरद्य कथं ललिता
तदनन्तलश(स)द्द(दृभ ?)[ग]वत्पदभक्तिविधौ सततं भव सम्पतिता ॥६७॥

तट(टि)नीगतभूमी(मि)रुहामिव सम्प्रति भाति विदूरविमुक्तिरी(रि)यं
पथि सञ्चरतामिव खे चरतामिव पुत्रकलत्रसुयुक्तिरी(रि)यम् ।
जलधौ चरतामिव नौर्वणिजां पथि सु(शु)क्तिलश(स)द्व्रजतोक्तिरी(रि)यं
तदहो हरिपादसरोजसुसेवनतो भवतो हि सुमुक्तिरी(रि)यम् ॥६८॥

कृतया सुतमित्रकलत्रजनैररिभिर्वत संसृतिवागुरया
कथमद्य मनोमृगरूपरसादिवने परिवद्धतरो दृढया ।
यदि मोचनशोचनतो हि विषि(षी)दसि किं परयाऽमलया कथया
अधुना परिकृत्य सुखी भव रे भगवत्पदभक्तिसुकर्तृकया ॥६९॥

गमनागमनं कतिधा न कृतं न धृतं भवता भगवच्चरणं
अत एव मनः श्रमवत्सततं न नतं तदपि श्रमसंहरणम् ।
यदि वाञ्छसि रे श्रमजन्यमहातपनाशकमासु(शु)महत्करणं
तदहो हरिनामसुधारसधामसुकाम पिब प्रचुरं शरणम् ॥७०॥

जपतामनुसञ्चर संरटतामटनं मटतो मटतश्चलतां
चलनं च विधेहि तथा भजनं हरिपादश(स)रोजयुगं भजताम् ।
नटनं नटतां भगवच्चरणस्य पुरो लुठनञ्च तथा लुठतां
पठनं हरिनाम परं पठतां रशनं भगवद्रसमारसताम् ॥७१॥

गमनं तु कृतं न कृतं हरिसद्मनि सम्भजनं न हरेर्भजनं
पठनं तु कृतं न हरेर्वचसां शरणं तु कृतं न हरेः शरणम् ।
नटनं तु कृतं न हरेः पुरतो रटनं तु कृतं न मते रटनं
तदिदं च वृथैव गतं सुजनुः कुजनुर्मम सम्प्रति किङ्करणम् ॥७२॥

कतिधा सहगैर्विषयैः समपि(पी)डि भवान् क्षणिकैरपि सङ्खलितः
विषयेषु च तेषु परं रमसे यतसे च तदर्थमलं रसितः ।
सहसे बहुधा कटु तद्वचनं न कदापि च सङ्गवशाच्चलितः
तदहो भगवज्जनसङ्गतोऽचलितो रसितो वलितो मुदितः ॥७३॥

किमकारि परारिपरुत्कदनं भवतो न सुतप्रमुखैः परुषं
अधुना पुनरेव वलन् कुरुषे कथमद्य च तैः कुसुतैश्च मुखम् ।
परिपि(पी)डित एव कदापि न तेषु जनेषु भवेषु करोषि रुषं
तदहो सुविरक्तिसुखं कलयन् त्यज सम्प्रति रे सकलं कलुषम् ॥७४॥

इयमिन्दुमुखी परिपश्यति मामिति किं मनसा बहुशो मनुते
मलपङ्कवशा(सा)रुधिरप्रयुता पललौघमुखी न घृणोदयते ।
तरलप्रचुरप्रलश(स)त्कुचयुग्मकुपिण्डसुखे बहुधा रमते
तदलं सकलं विजहत्सुविरक्तिवधु(धू)सुखमद्य न सन्तनुते ॥७५॥

इह मानसतीर्थलश(स)द्धरिनामजले हरिभक्तिलश(स)त्कमले
सुविरक्तिपराऽचलदिष्टकया(था ?)रचितप्रबलत्सुतटे विमले ।
गरुडध्वजहंसविराजिनि सै(शै)वलतुल्यतमोरहिते रसले
प्रयतः कुरु सज्जन मज्जनमासु(शु)चिराय विहाय सृतौ कुजले ॥७६॥

इह भूमी(मि)रुहे पतगौ रसतौ लश(स)तो न कदापि ततो व्रजतः
परमौ सुरमौ सुश(ष)मौ सुयुजौ न कदापि वियोगमिमौ कुरुतः ।
कतरः पतगो विषयैकरसं परमत्ति परोऽनशनः स्थिरतः
तदहो अनयोनशनं(?)चिदनन्तरसैकरसं भजते विनतः ॥७७॥

सुतमित्रकलत्रकुबन्धुजनस्मरणं सततं भवता क्रियते
अशने शयने गमने पठने रटने बत तैश्च पुनर्म्रियते ।
उदरं परिताडयता रुदता कुधिया न कदापि मनो धि(ध्रि)यते
तदिमान् सकलान् परितापकरान् जहता न विरक्तिरहो ध्रियते ॥७८॥

वणि(नि)ता मुदिता रसिता कतिधा रसरूपभरैर्भरिता गणिता
नरधूर्तविदूषकसङ्गवसे(शे)न पुनर्भवना सखिता रचिताः(ता ?) ।
खलदुष्टदुरीशकुवाङ्मनसा च धृता कुलिशावलिशं(सं)तुलिता
न हरिर्हरिभक्तजनो विदितो नरके नरके च गति(ति)र्भविता ॥७९॥

गणना नृपसद्मनि काममचित्तसुवित्तचये ये(?)किमु का मनना
सुकुटुम्बजनेऽपि सभाकरणेऽपि रणेऽपि च का रुचिरा करणा ।
विदुषां भवने प्र(य)तिनां गणने कृती(ति)नां सुकृतेऽपि च का घटना
तदिमा जनुरन्तरदाः सकलाः(ला)हरिभक्तिजने गणना गणना ॥८०॥

तनयैरनयैरधुना श(स)ततं क्षुभितोऽपि च तेषु परं रमसे
क्षणमात्रविलासिनी(नि)शासिनि मित्रकलत्रजने बहुधा यतसे ।
अरिदुष्टदुरीस(श)मुखं जठराय रटन् सुनटश्चवलोकयसे
अतिदुर्लभमानुषजन्मगतो भगवन्तमतोऽपि न सम्भजसे ॥८१॥

अनिदं जगदेतदतत्प्रतिभाति च यद्वरजालिकवद्विहरत्
अनदोऽपि प्रतीहि सुरज्जुभुजङ्गमबु(धु)द्धिवचस्तितया(?)विलसत् ।
कथमत्र विलासिधियं विदधासि पुनर्दिवि पुष्पसमं विकसत्
तदहो हरिपादपयोजसुराधम(य)तो न बहिः कुरु हृद् विचलत् ॥८२॥

रसरूपमहाविषयैररिभिः कतिभिर्भवकूपमिमां गमितः
हरिनामसुकामदवर्त्मनि सम्प्रचलन्म(न्न)निशं सहसोत्पतितः ।
परिमज्जसि सन्नत एव कथं तत आगमने भव सत्पतितः
हरिभक्तिसुरज्जुमधिश्रित एव भव द्रुतमेव जलोत्कलितः ॥८३॥

भवसान्द्रमहावनमध्यगतः कथमेभिरमीभिरहा कुमृगैः,
विषयैः सहितैर्वणि(नि)तासुतवन्धुमुखद्विपी(पि)नां च गणैर्नरगैः ।
परितोऽसि वृतोऽसि कदापि पुनर्न गतोऽसि मृतोऽसि महाभयदैः
तदहो हरिनाममहाहरिभिः शरणैरभयो भव सत्सुखदैः ॥८४॥

अटवी भगवज्जनसङ्गतिरत्र महाविटपी भगवत्पुरुषः,
भगवद्गुयशसा पयसा विमलेन परं परिपुनि(पूरि)तसत्परिखः ।
फलति प्रचुरं हरिनामफलं हरिभक्तिरसं सदतीवसुखः,
विषयक्षुधया तृषया (परिपु(पू)रित भु(भुं)क्ष्व फलं श(स)ततं सुसुखः ॥८५॥

शृणु चित्त सुधि(धी)वर धीवर किं भवभीमनदे मकरादिगतौ
प्लवनं कुरुषे विचलद्विषयोरगजातसुधीवरजातिमृतौ ।
हरिनाममहामकरग्रहवद्धरिभक्तिसुकि(की)र्तितरङ्गगतौ
प्रवनं तरणं सरितां च पतौ कुरु तत्र सुखेन महाचि(वि)रतौ ॥८६॥

भवनीरसभूमी(मि)रुहे हसिता फलिता नवपल्लविता न तता
न तता गुणिनो भ्रमराः सुतमित्रकलत्रमुखा [ः] कृमयो विरता[ः] ।
तदमुं जहता भवता विरसं विषयैः सकलैरतिहर्षयता
वहुनामफलैः सरसैः सहिते क्रियतां हरिभूमी(मि)रुहे सखिता ॥८७॥

भवसागर' 'मना यदि मे मम जीव शृणुष्व हितं वचनं
शिरसो निजभारमिमं सकलं त्यज पानकृते कुरु नो रचनम् ।
भवभीममहार्णवमध्यगतः सममज्जदसौ धृतसम्भरणः
अपनीतशिरोनिजभारभरः स तु पारगतः कृतसन्तरणः ॥८८॥

भवभीममहाम्बुधिपारनिषेधककाममहामदमोहमुखाः
तटिनीपतिपूर्वतटादपरं न तटं गमयन्ति कदापि रुषा ।
भ्रमतां यदि यान्ति तटं त्वपरं न चलन्ति पुनर्दृढवन्धनगाः
हरिनामसुचिह्नितपत्रवता सुतरन्ति जना भवतः सुखगाः ॥८९॥

वपुषः कति वा न भवन्ति तथा विलसत्पटुकीटगणास्तरलाः
जनुरन्तरतत्सदनन्तफलाभिनिवेशलसन्मतय(यः)कुटिलाः ।
कथमेषु निधाय तनूजधियं विलपन्ति जनाः सततं विकला [:]
तदहो भगवच्चरणं भजतां भवतां दिवसाः परियान्त्वमलाः ॥६०॥

विषयानुगमे क्रि(कृ)मी(मि)कीटपतङ्गजनुर्जगति प्रचुरं गलितं
कलयिष्यति किञ्च पुनर्जननं मरणं मम जीव समावलितम् ।
न भविष्यन्ति(ति) दुर्लभमत्र मनुष्यजनुर्हरिभक्तिकरं रसितं
तदिहानुगमं च विहाय परं हरिभक्तमनुव्रज रे सततम् ॥६१॥

विषयातिकरालभुजङ्गमसङ्गमतो न बिभेषि कथं कुमते
यदि दैववशात् कुपितेन च तेन विषेण सुदंशन एव कृते ।
मरणं जननं पुनरेव पुनर्मम चित्त कुयोनिषु योनी(नि)षु ते
तदलं भगवन्निजनाममनुं जप रे स(श)यने गमने सतते ॥६२॥

न जनुर्द्विजभूमी(मि)परो' 'रधुना मधुनाशनभक्तिरतः
कलये न ममोरपि(?)देव तनोरपि नो भगवन् भवदङ्घ्रिनतः ।
परये जनुरेव भवेदपि मे नियतं यदि नाथ शृणुष्व ततः
कथये तव सेवकसेवकजन्म मुहुर्मुहुरेव यतः स्पृहये ॥६३॥

चिकुरा रुचिरा अपि ते विशदा रसदा रसना अपि ते गलिताः
ललिता न तथापि महाकटुतो भवतो भवतो हि रतिर्विगता ।
भगवन्निजभक्तिरसे सरशे(से)मधुरे प्रचुरे न रतिं ददता
सबलीभवता भवता कवलीक्र(क्रि)यते भवलीलसुखं भ्रमता ॥६४॥

कटुतारसताजनभाषणता जहता निजशान्तिरसं रसता
दिवशा(सा)न् परियापयता विजने विजने भवने रतिमावहता।
स्वमिमं परिचिन्तयता न च किञ्चिदनेकजनेषु दयां दधतां(ता)
भ्रियतां भगवच्चरणद्वयपङ्कजमेव व(म)नोभ्रमतारटता ॥६५॥

सरितां पुलिने क्रियतां भवनं ह्रियतां शुभसज्जसुतादियुतं
परवञ्चनमोहमहोरगयुक्तबिलं सुबिलं मृतिदं विगतम् ।
म्रियतां भगवन्निजनामधनं भ्रियतां कृपणीभवता व्यथितं
यदनेन भवद्गमने परसद्मनि वर्त्मनि भुक्तिसुखं च तत् [ततम् ?] ॥९६॥

दलयन् मदमत्तमतङ्गजकुम्भयुगं हरिनामलश(स)त्सृणी(णि)ना
कलयन् परमां निवृर्तिं च पुनर्भगवन्निजभक्तिमहामणिना ।
स्फुटयन् सदयं हृदयं कमलं विमलं हरिकीर्तनतो रविना
विरम क्वचिदेव चिदेव हरिं रसयन् सततं मनसा कविना ॥९७॥

ममतारसताजनभाषणताखलताभ्रमयो मनसा चलिता[ः]
सुतबन्धुकलत्रसुमित्रसुशत्रमहामकरा अपि संविहता[ः] ।
अतिखेदविभेदतरङ्गचलत्तरयोऽपि मनो मम रे गमिता ः]
तदहो हरिनाथकृपावशतो रसतो भवसागरपारमिता[ः] ॥९८॥

विचरन् विचरन् पुरुषोत्तमसन्निधिमद्य गतो विरम प्रचुरं
रुचिरं भगवच्चरणं परिचिन्तय चित्त चिरं सकलाघहरम् ।
विनिवेदितमेव परं कवलं कवलं विपणौ विपणौ मधुरं
परिभु[ङ्]क्ष्व सुखेन सु(शु)नः स्व(श्व)पचोऽपि मुखाद् गलितं भ्रमिनाशकरम् ॥९९॥

कतिधा कथितं भगवत्पुरतः कथितं कतिधा च भवत्पुरतः
कथितेन मया यदुदेति विरक्तिरहो शृणु सम्प्रति संनियतः ।
विदिशश्च दिशं विचरन् विचरन् धिजह [द्] गृहसङ्गतिमाभरतः
तदिदं सकलं निज आत्मनि भावय सत्पुरुषोत्तमधामगतः ॥१००॥

इमा दुर्मिला दूतिका यस्य हस्ते कृता श्रीत्रिलोकेन नाथोद्भवेन ।
विरक्त्या सुसं(स ?)ख्या सुता मुक्तिरूपा नवीना वधूस्तस्य हस्तं गता स्यात् ॥१०१॥

शाके शास्त्रेन्दुसप्तोदधिसुतमितिगे नाथनामान्तवैद्यो-
द्भूतस्त्रैलोक्यनाथो निखिलबुधजनान् सङ्गमा[?]तापतप्तान् ।
दृष्ट्वा नापीव्य(र्व्य)धत्त प्रचुरहरिरसा दुर्मिलावद्धतीर्थाः
सद्रत्नैर्नामभिस्तै[र्]विमलमतिधृतैर्यानि लोकान् पनन्ति ॥१०२॥

इति श्रीसामन्तचक्रचूडामणिमरीचिनि(नी)राजितचरणपङ्कजश्रीमिश्रवैद्यनाथात्मजश्रीत्रिलोकनाथमिश्र-कृतं दुर्मिलाशतकं समाप्तम् ।

श(स)म्वत् १९३० अग्रहणकृष्णपञ्चमीरवौ विहारिणाऽलेखि ।